# ''कूर्मपुराणस्य ईश्वरगीतायाः श्रीमद्भगवद्गीतायाश्च तुलनात्मकं समीक्षणम्''

**डा० कपिलदेव पाण्डेयः**

कूर्मपुराणस्य उत्तरार्द्धे द्वे गीते स्त: ईश्वरगीता व्यासगीता च। किन्त्वत्र ईश्वरगीताया श्रीमद्भगवद्गीताया सह तुलना विमृश्यते, केनचिदंशेन साम्यात् केनचिदंशेन वैषम्याच्च। द्वयोरौपदेशिकत्वे साम्येऽपि उपदेष्टु: भेदाच्च। हाजरामहोदयानां मतेन ईश्वरगीता कस्मिंश्चिद्भिन्ने रूपे विद्यमानस्य वैष्णवस्य कूर्मपुराणस्यांश आसीत् पश्चाद् तत्पाशुपतैरात्मसात्कृतम्। तैरेतस्या: रचनाकालोऽपि निर्धारित: अष्टमशताब्द्या: ईसवीयाया प्रारम्भ:। श्रीमद्भगवद्गीता तु महाभारतान्तर्गतभीष्मपर्वण: पञ्चविंशाध्यायात् द्विचत्वारिंशाध्यायं यावत् अष्टादशसर्गात्मकोंऽशोऽस्ति। रचनाकालसन्दर्भेऽनया अनेके मतभेदा: उत्थापिता:। न केवलं कालविषयेऽस्या: याथार्थ्य विषयेऽपि समीक्षकेषु मतवैभिन्यं वर्तते। असंगति प्रयुक्तेन आरोपाधारेण एवं मन्यते यत् सम्प्रति उपलभ्यमाना श्रीमद्भगवद्गीता महाभारतीयाया: यथार्थगीताया: उपबृंहितरूपाऽस्ति। अन्यथा उभयो: सेनयोर्मध्ये श्रीकृष्णार्जुनयो: संवादो युद्धकाले न संभाव्यते। डा0 राधाकृष्णन् महोदयानां मतेन तु सत्यपि आरोपे महाभारतरचनाकालात् एव अद्यावधि अस्या: याथार्थ्य स्वरूपं वा अव्याहतं तदवस्थमेव। तत्र शैलीगतं साम्यमपि तस्या: महाभारतस्य अनुपहतमङ्गत्वमेव प्रमाणयति। श्रीमद्भगवद्गीतायां प्रतिपादिता: दार्शनिका: विचारा: एताम् उपनिषदां परवर्तिदर्शनप्रस्थानानां च मध्ये स्थापयन्ति। तत्र सांख्ययोगयोरुल्लेखो वर्तते। तदा वैदिकयज्ञा: वैदिकदर्शनसिद्धान्ता: अपि विद्यमाना: आसन्। के. टी. तैलङ्ग आर. जी. भण्डारकरमहोदययो: मतेन अस्या: रचनाकाल: ईसवीयपूर्व तृतीयचतुर्थशताब्द्यो: मध्ये निर्धारयितुं शक्यते । अत एव नि:सन्देहमुच्यते यत् महाभारते पुराणेषु च विद्यमानानां सर्वासां गीतानाम् निदर्शनमादर्शभूता वा श्रीमद्भगवद्गीता एव।

यद्यपि कूर्मपुराणस्य पूर्वार्द्धे विष्णोरेव प्राधान्यं वर्तते वैष्णवचरितत्वात्, तथापि उत्तरभागे यत्र ईश्वरगीता वर्तते, शिवस्य माहात्म्यं वर्णितमस्ति, स एवाय ईश्वररूपेण परब्रह्मरूपेण प्रकीर्तितोऽस्ति। वासुदेवस्य सन्निधौ सनत्कुमारप्रमुखान्ऋषीन् ईश्वर: शिव: गीताज्ञानम् उपदिदेश। ऋषीणाम् अष्टौ जिज्ञास्या: प्रश्ना: आसन् **1**. कृत्स्नस्यास्य जगत: किं कारणम्? **2**. क: सदाऽनुसंसरति, **3**. आत्मा कोऽस्ति, **4**. मुक्ति: का, **5**. संसार: किंनिमित्तक:, **6**. क: ईशान: संसारयति, **7**. क: सर्व प्रपश्यति, **8**. किं तत्परतरं ब्रह्म। प्रश्नास्त्वेते नारायणं प्रति आसन्। तस्मिन्नेव काले महादेव: शिव: प्रादुर्बभूव। जनार्दनस्य आग्रहेण परमेश्वर: शिव: अनुत्तमम् आत्मयोगम् उपदेष्टुंम्प्रारभत। श्रीमद्भगवद्गीता यदि भगवता श्रीकृष्णेन अर्जुनं प्रत्युपदिष्टा तर्हि ईश्वरगीता परमेश्वरेण शिवेन सनत्कुमारप्रमुखान्ऋषीन् प्रत्युपदिष्टा। प्रथमम् आत्मन: स्वरूपं वर्णितम्, यत: विश्वं विजायते यस्मिन् प्रविलीयते च। ततोऽसौ आत्मा निषेधरूपेण वर्ण्यते यत्अयं न संसरति न वा संसारयति। प्रकाशतमसोरिव प्रपञ्चपरमात्मनोरैक्यं कश्चित्सम्बन्धो वा नास्ति। आत्मा न प्रकृतिरस्ति न वा पुरुष:। अतस्तस्मिन् कर्तृत्वं भोक्तृत्वं वा नास्ति। किन्तु स्वभावत: चिन्मात्र: आनन्दस्वरूपश्चास्ति। दृश्यमानं जगत् छायेव परमात्मा च आतप इवास्ति, अत: परमार्थत: विलक्षणाविमौ। योगयुक्ता: मुनय: परमार्थत: आनन्दस्वरूपम् आत्मानं पश्यन्ति। 'अहं कर्ता', 'अहं सुखी', 'अहं दु:खी, स्थूल:, कृशो वेति या बुद्धि: सा अहंकारवशादात्मनि आरोप्यते ।

'अहंकाराविवेकेन कर्ताहमिति मन्यते' (कू.पु. **2.1.17**)

एवमेव श्रीमद्भगवद्गीतायां श्रीकृष्ण: शास्ति—

'अहंकारविमूढात्मा कर्ताहमिति मन्यते' (भ.गी. **3.27**)

अज्ञानवशात् अन्यथाज्ञानं यद्भवति तत्प्रकृतिसंगात् भवति। भगवद्गीतायामपि 'प्रकृते: क्रियमाणानि गुणै: कर्माणि सर्वश:।'

यथा अमल: स्फटिक: स्वप्रभया भाति तथैव उपाधिहीनो विमल: आत्मा प्रकाशमानो भवति। ईश्वर: कथयति "विज्ञानस्यैव अस्तित्वमस्ति प्रपञ्चस्य संसारस्य वा नास्ति। अज्ञानेन विज्ञानस्यावृतत्वात् लोको मोहं प्राप्नोति। एतद्विज्ञानं निर्मलं सूक्ष्मं निर्विकल्पम् अव्ययम्। अस्मात् भिन्नं सर्वमज्ञानमिति मे मतम्। एतत्सांख्यनाम-कमुत्तमं ज्ञानं युष्मान् प्रति मया भाषितम्। सर्ववेदान्तसारभूतमिदं ज्ञानम्। तत्र एकचित्तता हि योग इत्युच्यते। योगात् ज्ञानं जायते ज्ञानाच्च योगे प्रवृत्ति: भवति। योगज्ञानयुक्तस्य योगिन: किञ्चित् प्राप्तव्यं नावशिष्यते—

"यदेवं योगिनो यान्ति सांख्यैस्तदधिगम्यते।
एकं सांख्यं च योगं च य: पश्यति स तत्त्ववित्।।" (**2/2/42**)

एवमेव श्रीकृष्णोऽर्जुनमुपदिशति—

"सांख्ययोगौ पृथग्बाला: प्रवदन्ति न पण्डिता:।
एकमप्यास्थित: सम्यगुभयोर्विन्दते फलम्।।

यत्सांख्यै: प्राप्यते स्थानं तद्योगैरपिगम्यते।

एकं सांख्यं च योगं च य: पश्यति स पश्यति।।" (भ.गी. **5/4-5**)

ईश्वर: ईश्वरगीतायां कथयति—

"नापुत्रशिष्ययोगिभ्यो दातव्यं ब्रह्मवादिभि:।
मदुक्तमेतद् विज्ञानं सांख्ययोगसमाश्रयम्।।"

ईश्वरगीतानुसारेण अव्यक्तात् कालस्य प्रधानस्य परमपुरुषस्य उद्भवोऽभवत्। तेभ्य: कालादिभ्य: समस्तस्य जगत: उत्पत्तिरभवत्। अत: सर्वं जगद्ब्रह्ममयमस्ति। अव्यक्तमूर्तिना मया इदं विश्वं जगद्व्याप्तम् अस्ति। सर्वभूतानि मयि स्थितानि इति यो वेद स वेदवित्। प्रधानं पुरुषश्च इति तत्त्वद्वयं : वर्तते अनादि: काल: एव तयो: संयोजक:। श्रीमद्भगवद्गीतायां श्रीकृष्णो वदति 'काल: कलयतामहम्' (**10/30**) 'अहमेवाक्षय: कालो धाताऽहं विश्वतोमुख:।' (**10/33**) 'कालोऽस्मि लोकक्षयकृत्प्रवृद्धो लोकान्समाहर्तुमिह प्रवृत्त:।' (**11/32**)

ईश्वरगीतानुसारेण एतत्तत्त्वत्रयं (प्रधानं, पुरुष:, कालश्च) अव्यक्ततत्वेऽवस्थितमस्ति। महत्तत्त्वात् विशेषपर्यन्तं सर्व जगत् या उत्पादयति सैव प्रकृति:सर्वदेहिनो मोहयति। प्रकृतिस्थ: सन् य: प्रकृते: गुणान्भुङ्क्ते स: अहंकारविमुक्तत्वात् पञ्चविंशं तत्त्वमुच्यते। अविवेककारणात् पुरुषस्य संसरणम्भवति। प्रकृतौ कालेन सह संगात् एव अविवेक: उत्पद्यते।काल एव प्राणिन: सृजति, संहरति च।सर्वेऽपि कालस्य वशवर्तिन:, किन्तु काल: कस्यचिद्वशवर्ती नास्ति। इन्द्रियेभ्य: परं मन:, मनस: अहंकार:, अहंकारात् महत्तत्त्वं, महत: अव्यक्तम् अव्यक्तात् पर: पुरुषोऽस्ति।कठोपनिषदि वर्णितस्य सूक्ष्मताक्रमस्य प्रभावोऽत्र परिलक्ष्यते। ईश्वर: शिव: आत्मानं वर्णयन्ब्रूते—

'सोऽहं सृजामि सकलं संहरामि सदाजगत्।
मायी मायामयो देव: कालेन सह संगत:।।
मत्सन्निधावेव काल: करोति सकलं जगत्। (**2/3।22-23**)

अग्रे ईश्वर: कथयति "जातिभेदमविगणय्य ब्राह्मणा:, क्षत्रिया:, वैश्या:, शूद्रा: अन्ये नीचकार्येषु रता: अपि भक्तियुक्ता: सन्तो यदि मामुपासते ते मुक्ता: भवन्ति, कालेन यथासमयं मयि लीयन्ते च।

पत्रं पुष्पं फलं तोयं मदाराधनकारणात्।
यो मे ददाति नियत: स मे भक्त: प्रियो मत:।।**2/4/14**

तथैव गीतायां ब्रवीति—

"पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति।
तदहं भक्त्युपहृतमश्नामि प्रयतात्मन:।।" (9/26)

अत्र द्वयो: गीतयो: अर्थत: साम्यं नास्ति, तथापि शव्दसाम्यं तु वर्तते। किञ्च

न मद्भक्ता: विनश्यन्ति मद्भक्ता: वीतकल्मपा:।
आदावेतत् प्रतिज्ञातं न मे भक्त: प्रणश्यति।। कू.पु. **2/4/12**

एवमेव भगवता श्रीकृष्णेनाप्युक्तमासीत् 'स च मे न प्रणश्यति।' अत्रापि सन्दर्भसाम्याभावेऽपि शव्दसाम्यं द्वयो: दृश्यते।

शिव एव जगत: स्रष्टा परिपालक: संहर्ता च। तस्यैव शक्ति: मायास्ति या लोकं मोहयति। मायाशक्तिमत्त्वाद् स मायावी इति व्यपदिष्ट:। तस्यैव पराशक्ति: विद्यास्ति यया सा योगिनां हृदि संस्थितो भूत्वा मायां नाशयति। भगवद्गीतायां श्रीकृष्णो व्याचष्टे—

'दैवी ह्येपा गुणमयी मम माया दुरत्यया।
मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते।।" (7/14)

समस्तशक्तीनां प्रवर्तको निवर्तकश्च ईश्वर: शिव एव। तस्यैव एका शक्ति: व्रह्मरूपेण विविधं जगत् सृजति, तस्य अन्या विपुला शक्ति नारायणरूपेण जगत: पालनं रक्षणं वा विदधाति। रुद्ररूपिणी कालनाम्नि शक्ति: तमोगुणप्रधाना जगत् निहन्ति संहरति च। भगवान् महादेवो योगेश्वर ईश्वरगीतायाम्, भगवद्गीतायां तु श्रीकृष्णो योगेश्वर:।

सनत्कुमारादीन् सर्ववेदेपु निष्ठितं गुह्यं ज्ञानमुपदिश्य परमेश्वरो भगवान्ऐश्वरं भावं प्रदर्शयन् नर्तितुमारब्धवान्। ते तु साश्चर्यं ददृशु:। आनन्दपूर्णायतमानसास्तेतं स्तोतुं प्रचघमिरे। एवमेव भगवद्गीताया: एकादशेऽध्याये श्रीकृष्णो अर्जुनं स्वकीयं दिव्यम् ऐश्वरं रूपं प्रदर्शयन् अवोचत्—

'दिव्यं ददामि ते चक्षु: पश्य मे योगमैश्वरम्' (11/8)

तत्र अर्जुन: कृताञ्जलि: सन् विस्मयाविष्ट: तस्य स्तुतिं कृतवान्। अनयो: द्वयो: स्तुत्यो: महत् साम्यमवलोक्यते। यथा भगवत्स्तुतौ 'अणोरणीयान्' (8/9) इति औपनिपदिकं वाक्यं प्रयुक्तं तथैव सनत्कुमारादय: ऋषय: ईश्वरगीतायां शिवस्तुतिसन्दर्भे व्याजहु:—

"त्वत्तः प्रसूता जगतः प्रसूतिः सर्वात्मभूस्त्वं परमाणुभूतः।
अणोरणीयान् महतो महीयांस्त्वामेव सर्वं प्रवदन्ति सन्तः।।

कूर्मपुराणस्य वैशिष्ट्यमेकमवधेयम्यत् अत्र विशेषत ईश्वरगीतायां बहुशः शिवेन सह विष्णोरेकात्म्यं प्रतिपादितम्–

ईश्वरेणैकतापन्नमपश्यन् ब्रह्मवादिनः ।
दृष्ट्वा तदैश्वरं रूपं रुद्रनारायणात्मकम्।। ई.गी. **2.5.17-18**

## स्तुत्योः साम्यम्

| भगवद्गीतायाम् | ईश्वरगीतायाम् |
|---|---|
| त्वमक्षरं परमं वेदितव्यं | त्वमक्षरं परमं वेदितव्यम् |
| त्वमस्य विश्वस्य परं निधानम्। | त्वमस्य विश्वस्य परं निधानम्। |
| त्वमव्ययः शाश्वतधर्मगोप्ता | त्वमव्ययः शाश्वतधर्मगोप्ता |
| सनातनस्त्वं पुरुषो मतो मे।। (11/18) | सनातनस्त्वं पुरुषोत्तमोऽसि।। **2/5/351** |
| आदित्यवर्णं तमसः परस्तात्। (8/9) | त्वामेकमाहुः पुरुष पुराण |
| | मादित्यवर्णं तमसः परस्तात्।। **2/5/3** |

एवं बहुत्र उभयोः स्तुत्योः साम्यं दृश्यते।

सर्वेषां पदार्थानां मध्येऽवस्थितः ईश्वरः स्वक्रियाशक्त्या सम्पूर्णं जगत् प्रेरयति। कालरूपोऽसौ कलात्मकं जगत् प्रेरयति। एकांशेन स जगत् सृजति, अपरेणांशेन संहरति च। आदिमध्यान्तहीनः सन्नपि सृष्टेरादौ प्रकृतिपुरुषौ क्षोभयति। तेन ताभ्यां महदादिक्रमेण विश्वं जायते। मतमेतत् सांख्योक्तमतमनुहरति। तन्नियोगतः एव चतुर्मुखो ब्रह्मा सृजति, तस्यैव परमा मूर्तिः नारायणरूपा लोकानां परिपालनं करोति। कालात्मिका रुद्ररूपा मूर्तिः सर्वं संहरति। तच्छक्तिप्रेरितोऽग्निदेवः वैश्वानररूपेण भुक्तमाहारजातं पचति। बहिः स्थितो वायुदेवः भूतानां शरीराणि बिभर्ति। तात्पर्यतः ततोऽन्यत् न किंचिद् विद्यते। अनेन प्रकारेण कूर्मपुराणस्य ईश्वरस्य सर्वव्यापित्वं ईश्वरमुखेन वर्णितमस्ति। श्रीमदभगवद्गीतायाम् एवमेव श्रीकृष्णो वदति—

"अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा।।"
"मत्तः परतरं नान्यत् किञ्चिदस्ति धनञ्जय।" (7/6-7)

श्रीकृष्णोऽर्जुने व्याहरति—

'यं प्राप्य न निवर्तन्ते तद्धाम परमं मम ।' 8/21

कूर्मपुराणे ईश्वरः ऋषीन् व्याचष्टे—

'नित्यानन्दं निर्विकल्पं तद्धाम परमं मम।' कू. पु. 2/7/21

भगवद्गीतायाः दशमेऽध्याये श्रीकृष्णकृतेन विभूतीनां वर्णनेन सह कूर्मपुराणीय ईश्वरगीतायाः द्वितीयभागे सप्तमे अध्याये कृतस्य विभूतिवर्णनस्य बहुतरं साम्यं वर्तते। न केवलमर्थसाम्यम् अपितु शब्दसाम्यमपि द्रष्टव्यमस्ति। यथा

'सिद्धानां कपिलो मुनि:', 'आदित्यानामहं विष्णु:', 'वसूनामस्मि पावक:', 'ऐरावतो गजेन्द्राणाम्', 'काल: कलयतामहम्' इत्यादिषु। सप्तमाध्यायस्यान्ते पशुपाशपशुपति विवेचनेन अत्र कूर्मपुराणे पाशुपतप्रभाव: प्रत्येतुं शक्यते ।

यथा मया पूर्वमेव संकेतितम्, श्रीमद्भगवद्गीतायां कूर्मपुराणस्य ईश्वरगीतायां च उभयत्र सांख्यसिद्धान्तानां सन्दर्भा: लभ्यन्ते। सांख्यमतानुसारेण प्रकृति: त्रिगुणात्मिका। जगत: कृत्स्नं वस्तु त्रिगुणात्मकं सत्त्वरजस्तमोमयमस्ति। त्रयाणां गुणानां संस्थानभेदादेव व्यक्ततत्त्वेषु भेदो भवति। प्रकृति: अतएव परिणामात्मिका। परिणामशून्यस्तु केवलं पुरुष एव। भगवद्गीतायां श्रद्धा त्रिविधा उक्ता सात्त्विकी, राजसी तामसी च। यज्ञस्त्रिविध: तपस्त्रिविधं, दानं त्रिविधं, आहारस्त्रिविध:, त्यागस्त्रिविध:, सर्वं त्रिविधं गुणत्रयभेदप्रभावात्। तथा हि—

"ज्ञानं ज्ञेयं परिज्ञाता त्रिविधा कर्मचोदिता।
करणं कर्म कर्तेति त्रिविध: कर्मसंग्रह:।।
ज्ञानं कर्म च कर्ता च त्रिधैव गुणभेदत: ।
प्रोच्यते गुणसंस्थाने यथावच्छृणुतान्यपि।।" (भ.गी. 18/18-19)

'नासतो विद्यते भावो नाभावो विद्यते सत:' इति भगवद्गीतोक्ति: सांख्यदर्शनाभिमतं सत्कार्यवादमेव साधयति।

कूर्मपुराणस्थाया ईश्वरगीताया अष्टमेऽध्याये सांख्यरीत्या ब्रह्मण: सृष्टेश्चोत्पत्ति: वर्णिताऽस्ति। ईश्वरो ब्रह्मणय: शाश्वत: निर्मल: अव्यय: केवलोऽस्ति। असौ परमेश्वर: मूलमायानामकं गर्भं दधाति। तेन प्रधानस्य, पुरुषस्य, महत्तत्त्वस्य, भूतादे:, तन्मात्राणां, महाभूतानाम् इन्द्रियाणां चोत्पत्ति: भवति। सर्वज्ञता, तृप्ति:, अनादिबोध:, स्वतन्त्रता, अलुप्तशक्ति:, अनन्तशक्तिश्च महेश्वरस्य षडानि सन्ति। पञ्चतन्मात्राणि मन:, आत्मा चेति सप्त सूक्ष्मतत्त्वानि सन्ति। हेतुरूपा या प्रकृतिरस्ति सैव प्रधानमुच्यते। अद्वितीय:, आदिस्वरूप: परमेष्ठी सत्यरूपो महेश्वर एव पुरुष:। ईश्वरगीताया: दशमोऽध्याये परमतत्त्वस्य परमज्ञानस्य च विवेचनमस्ति। तदनुसारेण—

"तस्मादनादिमध्यान्तं वस्त्वेकं परमं शिवम्।
स ईश्वरो महादेवस्तं विज्ञाय विमुच्यते।।" 2/10/12
विभाति देव: शिव एव केवल: 12/10/161

तद्विषयकं परमं ज्ञानं योगसाधनानिरतो योगी एव विजानाति—

इत्येतदुक्तं परमं रहस्यं, ज्ञानामृतं सर्ववेदेषु गूढम्।
जानाति योगी विजनेऽथदेशे युञ्जीत योगं प्रयतो ह्यजस्रम्।। 2/10/17

अत एवान्तिके एकादशेऽध्याये योगोपदेश: कृतोऽस्ति। योगाग्नि: अशेषं पापपञ्जरं क्षिप्रं दहति। तत: प्रसन्नं ज्ञानं जायते। योगज्ञानयोरन्योऽन्याश्रय: सम्बन्धोऽस्ति। योगात् ज्ञानं जायते ज्ञानाच्च योगे प्रवृत्ति: भवति। योगज्ञानसम्पन्ने जने महेश्वरस्य प्रसादो भवति। योगो द्विविधो भवति प्रथमोऽभाव इत्युच्यते, अपरश्च महायोग:। अभावयोगे सर्वनिराभासस्य शून्यस्य स्वरूपस्य चिन्तनं भवति। महायोगे तु नित्यानन्दस्वरूपस्य निरञ्जनस्य परमेश्वरस्यस्वरूपैक्यस्य प्रतीतिर्भवति। अत्र विमुक्तो पुरुष: विश्वं साक्षादीश्वररूपेण पश्यति। अत: स: योगानां परमोयोगो मन्यते। अष्टा योगेन ईश्वरे एकचित्ततायोगो वृत्त्यन्तरनिरोधाद्भवति। अष्टाङ्गानि यथा—

1. यम :— अहिंसा, सत्यम्, अस्तेयं, ब्रह्मचर्यम्, अपरिग्रहश्च।

2. नियमा :— तप :, स्वाध्याय :, सन्तोष :, शौचम्, ईश्वरपूजनञ्च।

3. आसनम्—स्वस्तिकासनपद्मासनअर्द्धासनभेदेन आसनं त्रिविधं वर्णितम्।

4. प्राणायाम :—स्वदेहजो वायु : प्राण :। तन्निरोधनम्एव प्राणायाम : । स उत्तममध्यम अधमभेदात् त्रिविध :। सगर्भ अगर्भ भेदाच्च द्विविधो भवति।

5. प्रत्याहार :—विषयेषु स्वभावतो विचरताम् इन्द्रियाणाम् निग्रह : प्रत्याहार :।

6. धारणा— हृदयकमले, नाभ्यां, मूर्ध्नि, पर्वतशिखरे, एवं विधेषु अन्येषु स्थानेषु वा चित्तबन्धनं धारणा इत्युच्यते।

7. ध्यानम्—चित्तस्य एकाग्रतामालम्ब्य वृत्यन्तरै : असंसृष्टा वृत्ते : सततप्रवाह एव ध्यानम्।

8. समाधि :—देशावलम्बनवर्जिता चित्तस्य एकाकारता एव समाधि :। अर्थमात्रेण प्रत्यय : एव उत्तमम् योगसाधनम्।

ईश्वरगीतायां 'सर्वेषामष्टानामङ्गानां स्वरूपं, भेदोपभेदा :, अनुष्ठानविधयश्चेश्वरेण सविस्तारं विवेचिता :, तत् फलं च निर्दिष्टं किन्तु निबन्धविस्तारभिया लघुकायेऽस्मिन्तत्सर्व न प्रपञ्च्यते। ध्यानविवेचनप्रसङ्ग ध्यानान्तरं विवृण्वता ईश्वरेणोक्तम्—

"एष पाशुपतो योग: पशुपाशविमुक्तये।
सर्ववेदानासारोऽयम् अत्याश्रममिति श्रुति :। ।" **2/11/67**

एतद्योगानुष्ठानपरिपूतानां विषये उच्यते—

"ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम्। ई.गी. **2/11/72** भ.गी. **4/11**
ज्ञानयोगेन मां तस्मादयजेत परमेश्वरम्। ।

अथवा भक्तियोगेन वैराग्येण परेण तु ।
चेतसा बोधयुक्तेन पूजयेन्मां सदा शुचि :। ।" **2/11/72-73**

अत्र ईश्वरेण प्रोक्ता: चत्वार: श्लोका: (**2/11/75-78**) भगवद्गीतायां श्रीकृष्णेन प्रोक्तै: चतुर्भि: श्लोकै: पूर्ण मक्षरश : साम्यं भजन्ते । तथा हि—

"अद्वेष्टा सर्वभूतानां मैत्र: करुण एव च।
निर्ममो निरहंकारो यो मद्भक्त: स मे प्रिय :। ।
संतुष्ट: सततं योगी यतात्मा दृढनिश्चय :।
मय्यर्पितमनोबुद्धिर्यो मद्भक्त: स मे प्रिय :। ।
यस्मान्नोद्विजते लोको लोकान्नोद्विजते च य :।
हर्षामर्षभयोद्वेगैर्मुक्तो य: स च मे प्रिय :। ।
अनपेक्ष: शुचिर्दक्ष: उदासीनो गतव्यथ :।
सर्वारम्भपरित्यागी भक्तिमान् य: स मे प्रिय :। । भ.गी.**12/13-16**

एतदतिरिक्तम्अनेके श्लोका: सन्ति येषां पादेषु पदेषु वा मिथ: साम्यम् अवलोक्यते। भगवद्गीतायां यदि श्रीकृष्णो ब्रूते—

'अनन्याश्चिन्तयन्तो मां ये जना: पर्युपासते।
तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यम्।।**9/22**

ईश्वरगीतायामीश्वरो ब्रूते—

मद्बुद्धयो मां सततं पूजयन्तीह ये जना:।
तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यम्।।**2/11/88**

ईश्वरेकृते उपदेशे वाराणसीं शिवनगरीं प्रति अभिनिवेशोऽप्युपलभ्यते—

'वसेद् वाऽमरणाद्विप्रा: वाराणस्यां समाहित:।
सोऽपीश्वरप्रसादेन याति तत्परमं पदम्।। ई.गी. **2/11/101**
तत्रोत्क्रमणकाले हि सर्वेषामेव देहिनाम्।
ददाति तत्परं ज्ञानं येन मुच्येत बन्धनात्।। **2/22/102**

योगोपदेशान्ते ईश्वर: विष्णुशिवयो: अभेदमैकात्म्यं वा प्रतिपादयन् व्यवहरति योऽयं नारायण: स एवाहमीश्वर:। एषा नारायणाभिधा मूर्ति: ममैव, द्वयोरन्तरं ये न पश्यन्ति तेभ्य: एव गीतोपदेशोऽयं देय:। ये अन्यथा पश्यन्ति, ते पुन: पुन: जायन्ते, तेषां मुक्तिर्नभवति। तथा हि—

''ये त्विमं विष्णुमव्यक्तं मां वा देवं महेश्वरम्।
एकीभावेन पश्यन्ति न तेषां पुनरुद्भव:।।

मूर्खं वा पण्डितं वापि ब्राह्मणं वा मदाश्रयम्।
मोचयामि श्वपाकं वा न नारायणनिन्दकम्।।

श्रीमद्भगवद्गीता योगग्रन्थरूपेण लोके विद्वत्सु च प्रथिता तस्या: सर्वेऽपि अध्याया: तत्तद्योगनाम्ना (अर्जुनविषादयोगादारभ्य मोक्षसंन्यासयोगपर्यन्तम्) व्यपदिष्टा:। तत्र प्रत्यध्यायषट्कं कर्मज्ञानभक्तियोगा: प्रामुख्येन निष्कर्षविषयीकृता:, तथापि अष्टांगयोगस्य कुत्रापि एकम् प्रतिपादनं न कृतं भगवता। विच्छिन्नरूपेण आसनप्राणायामप्रत्याहारादीनामानां स्वरूपं भङ्ग्यन्तरेण विविक्तमस्ति यथा 'प्राणायामपरायणा:' **4/29** 'ध्यानयोगपरोनित्यम्' **18/52** 'धारयन्नचलं स्थिर:' **18/13** 'शुचौ देशे प्रतिष्ठाप्य स्थिरमासनमात्मन:' **18/11** इत्यादिरूपेण।

निष्कर्षत: ईश्वरगीताया: केनचिदंशेन वैशिष्ट्ये सत्यपि भगवद्गीतेश्वरगीतयो: साम्यं श्लाघनीयम्। गीताद्वयेऽस्मिन्वक्तृविपये भेद: एकत्र श्रीकृष्णोऽपरत्र ईश्वर: शिव इति शम्।